# શિવસ્તવરાજઃ

## Shivastavarajah

---

સૂત ઉવાચ ||

એકદા નારદો યોગી પરાનુગ્રહતત્પરઃ |
વિમત્સરો વીતરાગો બ્રહ્મલોકમુપાયયૌ ||૧||

તત્ર દૃષ્ટ્વા સમાસીનં વિધાતારં જગત્પતિમ |
પ્રણમ્ય શિરસા ભૂમૌ કૃતાઞ્જલિરભાષત ||૨||

નારદ ઉવાચ ||

બ્રહ્મઞ્જગત્પતે તાત નતોઽસ્મિ ત્વત્પદામ્બુજમ |
કૃપયા પરયા દેવ યત્પૃચ્છામિ તદુચ્યતામ ||૩||

શ્રુતિશાસ્ત્રપુરાણાનિ ત્વદાસ્યાત્સંશ્રુતાનિ ચ |
તથાપિ મન્મનો યાતિ સન્દેહં મોહકારણમ ||૪||

સર્વમન્ત્રાધિકો મન્ત્રઃ સદા જાપ્યઃ ક ઉચ્યતે |
સર્વધ્યાનાદિકં ધ્યાનં સદા ધ્યેયમિહાસ્તિ કિમ ||૫||

વેદોપનિષદાં સારમાયુઃશ્રીજયવર્ધનમ |
મુક્તિકાઙ્ક્ષાપરૈર્નિત્યં કઃ સ્તવઃ પઠ્યતે બુધૈઃ || ૬||

ઇમં મત્સંશયં તાત ત્વં ભેત્તાસિ ન કશ્ચન |
બ્રુહિ કારુણ્યભાવેન મહ્યં શુશ્રૂષવે હિ તમ ||૭||

શ્રુત્વાઽઙ્ગજવચો વેધા હૃદિ હર્ષમુપાગતઃ |
દેવદેવં શિવાકાન્તં નત્વા ચાહ મુનીશ્વરમ ||૮||

બ્રહ્મોવાચ ||

સાધુ પૃષ્ટં મહાપ્રાજ્ઞ લોકાનુગ્રહ તત્પર |
સત્સર્વં તે પ્રવક્ષ્યામિ ગોપનીયં પ્રયત્નતઃ ||૯||

પ્રણવં  પૂર્વમુચ્ચાર્ય નમઃશબ્દં સમુચ્ચરેત |
સચતુર્થ્યૈકવચનં શિવં ચૈવ સમુચ્ચરેત ||૧૦||

એષ શૈવો મહામન્ત્રઃ ષડ્વર્ણાખ્યો વિમુક્તિદઃ |

સર્વમન્ત્રાધિકઃ પ્રોક્તઃ શિવેન જ્ઞાનરૂપિણા ||૧૧||

અનેન મન્ત્રરાજેન નાશયિતું ન શક્યતે |
તચ્ચ પાપં ન પશ્યામિ માર્ગમાણોઽપિ સર્વદા ||૧૨||

અયં સંસારદાવાગ્નિર્મોહસાગરવાડવઃ |
તસ્માત્પ્રયત્નતઃ પુત્ર મન્ત્રો ગ્રાહ્યો મુમુક્ષુભિઃ ||૧૩||

માતૃપુત્રાદિહા યોઽપિ વેદધર્મવિવર્જિતઃ |
સકૃદુચ્ચરણાદસ્ય સાયુજ્યમુક્તિમાપ્નુયાત ||૧૪||

કિં પુનર્વક્ષ્યતે પુત્ર સ્વાચારપરિનિષ્ઠિતઃ |
સર્વમન્ત્રાન્વિસૃજ્ય ત્વમિમં મન્ત્રં સદા જપ||૧૫||

ધ્યાનં તેઽહં પ્રવક્ષ્યામિ જ્ઞાત્વા યન્મુચ્યતેઽચિરાત |
વેદોપનિષદુક્તં ચ યોગગમ્યં સનાતનમ ||૧૬||

ઇન્દ્રિયાણિ નિયમ્યાદૌ યતવાગ્યતમાનસઃ |
સ્વસ્તિકાદ્યાસનયુતો હૃદિ ધ્યાનં સમારભેત ||૧૭||

નાભિનાલં હૃદિસ્થં ચ પઙ્કજં પરિકલ્પયેત |
રક્તવર્ણમષ્ટદળં ચન્દ્રસૂર્યાદિશોભિતમ ||૧૮||

સમન્તાત્કલ્પવૃક્ષેણ વેષ્ટિતં કાન્તિમત્સદા |
તન્મધ્યે શઙ્કરં ધ્યાયેદ્દેવદેવં જગદ્ગુરુમ ||૧૯||

કર્પૂરસદૃશં ચન્દ્રશેખરં શૂલપાણિનમ |
ત્રિલોચનં મહાદેવં દ્વિભુજં ભસ્મભૂષિતમ ||૨૦||

પરાર્ધભૂષણયુતં ક્વણન્નૂપુરમણ્ડિતમ |
સરત્નમેખલાબદ્ધકટિવસ્ત્રં સકુણ્ડલમ ||૨૧||

નીલકણ્ઠં જટાવન્તં સકિરીટં સુશોભિતમ |
ગ્રૈવેયાદિપ્રબન્ધાઢ્યં પાર્વતીસહિતં પુરમ ||૨૨||

કૃપાલું જગદાધારં સ્કન્દાદિપરિવેષ્ટિતમ
ઇન્દ્રેણ પૂજિતં યક્ષરાજેન વ્યજિતં વિભુમ ||૨૩||

પ્રેતરાજસ્તુતં નીરનાથેન નામિતં મુહુઃ |
બ્રહ્મણા ગીયમાનં ચ વિષ્ણુવન્દ્યં મુનિસ્તુતમ ||૨૪||

ધ્યાનમેતન્મયા ખ્યાતં સૂત વેદાન્તશેખરમ |
સર્વપાપક્ષયકરં જયસંપત્તિવર્ધનમ ||૨૫||

અનેન સદૃશં તાત નાસ્તિ સંસારતારકમ |
સર્વધ્યાનાદિકં ધ્યાનં ગોપનીયં સુત ત્વયા|| ૨૬||

કાયવાઙ્માનસોત્થં યત્પાપમન્યચ્ચ વિદ્યતે |
તત્સર્વે નાશમાયાતિ ધ્યાનાત્સત્યં વચો મમ ||૨૭||

વેદશાસ્ત્રપુરાણાનિ સેતિહાસાનિ યાનિ ચ |
ધ્યાનસ્ય તાનિ સર્વાણિ કલાં નાર્હન્તિ ષોડશીમ ||૨૮||

પ્રેમ્ણા કુરુ મહાભાગ ધ્યાનમેતદ્વિમુક્તિદમ |
અથ તે વચ્મ્યહં યોગિન સ્તવં સર્વોત્તમં ચ યત ||૨૯||

બ્રહ્માસ્યૈવ ઋષિઃ પ્રોક્તોઽનુષ્ટુપ છન્દઃ પ્રકીર્તિતમ |
શિવો વ દૈવતં પ્રોક્તં બીજં મૃત્યુઞ્જયં મતમ ||૩૦||

કીલકં નીલકણ્ઠશ્ચ શક્તિઃ પ્રોક્તા હરસ્તથા |
નિયોગઃ સર્વશિદ્ધ્યર્થં મુક્તિકામાય વૈ મતઃ ||૩૧||

શિરસ્યાસ્યે હૃદિ પદે કટ્યાં બાહ્વોસ્તુ વ્યાપકે |
ઋષ્યાદીનિ ક્રમાદ્યુઞ્જેત્સાઙ્ગુષ્ઠાઙ્ગુલિભિઃ સુત ||૩૨||

મન્ત્રન્યાસં તતઃ કુર્યાચ્છૃણુ ચૈકાગ્રમાનસઃ |
ષડક્ષરાણિ યુઞ્જીયાદઙ્ગુષ્ઠાદ્યઙ્ગુલીષુ ચ ||૩૩||

હૃદયે ચ શિરસ્યેવ શિખાયાં કવચે યથા |
નેત્રત્રયે તથાઽસ્ત્રે ચ વર્ણા હ્યેવં ચ ષટ ક્રમાત ||૩૪||

નમઃ સ્વાહા વષટ હું ચ સવૌષટ ફટ્ક્રમો વદેત |
મન્ત્રન્યાસમિમં કૃત્વા સ્તવન્યાસં સમાચરેત ||૩૫||

શિવં મૃડં પશુપતિં શઙ્કરં ચન્દ્રશેખરમ |
ભવં ચૈવ ક્રમાદેવમઙ્ગુષ્ઠાદિહૃદાદિષુ ||૩૬||

સર્વન્યાસાન્પ્રયુઞ્જીત ચતુર્થીસહિતાન્સુત |
નમોયુતાન્નમશ્ચૈવ શિરસાદિષુ વર્જયેત ||૩૭||

શિવં સર્વાત્મકં સર્વપતિં સર્વજનપ્રિયમ |
સર્વદુઃખહરં ચૈવ મોહનં ગિરિશં ભજે ||૩૮||

કામઘ્નં કામદં કાન્તં કાલમૃત્યુનિવર્તકમ |
કલાવન્તં કલાધીશં વન્દેઽહં ગિરિજાપતિમ ||૩૯||

પરેશં પરમં દેવં પરંબ્રહ્મ પરાત્પરમ |
પરપીડાહરં નિત્યં પ્રણમામિ વૃષધ્વજમ ||૪૦||

લોકેશં લોકવન્દ્યં ચ લોકકર્તારમીશ્વરમ |
લોકપાલં હરં વન્દે ધીરં શશિવિભૂષણમ ||૪૧||

શિવાપતિં ગિરિપતિં સર્વદેવપતિં વિભુમ |
પ્રમથાધિપતિં સૂક્ષ્મં નૌમ્યહં શિખિલોચનમ ||૪૨||

ભૂતેશં ભૂતનાથં ચ ભૂતપ્રેતવિનાશનમ |
ભૂધરં ભૂપતિં શાન્તં શૂલપાણિમહં ભજે ||૪૩||

કૈલાસવાસિનં રૌદ્રં ફણિરાજવિભૂષણમ |
ફણિબદ્ધજટાજૂટં પ્રણમામિ સદાશિવમ ||૪૪||

નીલકણ્ઠં દશભુજં ત્ર્યક્ષં ધૂમ્રવિલોચનમ |
દિગંબરં દિશાધીશં નમામિ વિષભૂષણમ ||૪૫||

મુક્તીશં મુક્તિદં મુક્તં મુક્તગમ્યં સનાતનમ |
સત્પતિં નિર્મલં શંભું નતોઽસ્મિ સકલાર્થદમ ||૪૬||

વિશ્વેશં વિશ્વનાથં ચ વિશ્વપાલનતત્પરમ |
વિશ્વમૂર્તિં વિશ્વહરં પ્રણમામિ જટાધરમ ||૪૭||

ગઙ્ગાધરં કપાલાક્ષં પઞ્ચવક્ત્રં ત્રિલોચનમ |
વિદ્યુત્કોટિપ્રતીકાશં વન્દેઽહં પાર્વતીપતિમ ||૪૮||

સ્ફટિકાભં જનાર્તિઘ્નં દેવદેવમુમાપતિમ ||
ત્રિપુરારિં ત્રિલોકેશં નતોઽસ્મિ ભવતારકમ ||૪૯||

અવ્યક્તમક્ષરં દાન્તં મોહસાગરતારકમ |
સ્તુતિપ્રિયં ભક્તિગમ્યં સદા વન્દે હરિપ્રિયમ ||૫૦||

અમલં નિર્મલં નાથમપમૃત્યુભયાપહમ
ભીમયુદ્ધકરં ભીમવરદં તં નતોઽસ્મ્યહમ ||૫૧||

હરિચક્રપ્રદં યોગિધ્યેયમૂર્તિં સુમઙ્ગળમ |
ગજચર્મામ્બરધરં પ્રણમામિ વિભૂતિદમ || ૫૨||

આનન્દકારિણં સૌમ્યં સુન્દરં ભુવનેશ્વરમ |
કાશિપ્રિયં કાશિરાજં વરદં પ્રણતોઽસ્મ્યહમ ||૫૩||

શ્મશાનવાસિનં ભવ્યં ગ્રહપીડાવિનાશનમ |

મહાન્તં પ્રણવં યોગં ભજેઽહં દીનરક્ષકમ ||૫૪||

જ્યોતિર્મયં જ્યોતિરૂપં જિતક્રોધં તપસ્વિનમ |
અનન્તં સ્વર્ગદં સ્વર્ગપાલં વન્દે નિરઞ્જનમ ||૫૫||

વેદવેદ્યં પાપહરં ગુપ્તનાથમતીન્દ્રિયમ|
સત્યાત્મકં સત્યહરં નિરીહં તં નતોઽસ્મ્યહમ ||૫૬||

દ્વીપિચર્મોત્તરીયં ચ શવમૂર્ધાવિભૂષણમ |
અસ્થિમાલં શ્વેતવર્ણં નમામિ ચન્દ્રશેખરમ ||૫૭||

શૂલિનં સર્વભૂતસ્થં ભક્તોદ્ધરણસંસ્થિતમ |
લિઙ્ગમૂર્તિં સિદ્ધસેવ્યં સિદ્ધસિદ્ધિપ્રદાયકમ ||૫૮||

અનાદિનિધનાખ્યં તં રામસેવ્યં જયપ્રદમ |
યોધાદિં યજ્ઞભોક્તારં વન્દે નિત્યં પરાવરમ ||૫૯||

અચિન્ત્યમચલં વિષ્ણું મહાભાગવતોત્તમમ |
પરધ્નં પરવેદ્યં ચ વન્દે વૈકુણ્ઠનાયકમ ||૬૦||

આનન્દં નિર્ભયં ભક્તવાઞ્છિતાર્થપ્રદાયકમ |
ભવાનીપતિમાચાર્યં વન્દેઽહં નન્દિકેશ્વરમ ||૬૧||

સોમપ્રિયં સોમનાથં યક્ષરાજનિષેવિતમ |
સર્વાધારં સુવિસ્તારં પ્રણમામિ વિભૂતિદમ ||૬૨||

અનન્તનામાનમનન્તરૂપમનાદિમધ્યાન્તમનાદિસત્ત્વમ |
ચિદ્રૂપમેકં ભવનાગસિંહં ભજામિ નિત્યં ભુવનાધિનાથમ ||૬૩||

વેદોપગીતં વિધુશેખરં ચ સુરારિનાથાર્ચિતપાદપદ્મમ |
કર્પૂરગૌરં ભુજગેન્દ્રહારં જાનામિ તત્ત્વં શિવમેવ નાન્યમ ||૬૪||

ગણાધિનાથં શિતિકણ્ઠમાદ્યં તેજસ્વિનં સર્વમનોભિરામમ |
સર્વજ્ઞમીશં જગદાત્મકં ચ પઞ્ચાનનં નિત્યમહં નમામિ ||૬૫||

વિશ્વસૃજં નૃત્યકરં પ્રિયં તં વિશ્વાત્મકં વિશ્વવિધૂતપાપમ |
મૃત્યુઞ્જયં ભાલવિલોચનં ચ ચેતઃ સદા ચિન્તય દેવદેવમ ||૬૬||

કપાલિનં સર્પકૃતાવતંસં મનોવચોગોચરમમ્બુજાક્ષમ |
ક્ષમામ્બુધિં દીનદયાકરં તં નમામિ નિત્યં ભવરોગવૈદ્યમ ||૬૭||

સર્વાન્તરસ્થં જગદાદિહેતું કાલજ્ઞમાત્માનમનન્તપાદમ |
અનન્તબાહૂદરમસ્તકાક્ષં લલાટનેત્રં ભજ ચન્દ્રમૌલિમ ||૬૮||

સર્વપ્રદં ભક્તસુખાવહં ચ પુષ્પાયુધાદિપ્રણતિપ્રિયં ચ |
ત્રિલોકનાથં ઋણબન્ધનાશં ભજસ્વ નિત્યં પ્રણતાર્તિનાશમ ||૬૯||

આનન્દમૂર્તિં સુખકલ્પવૃક્ષં કુમારનાથં વિધૃતપ્રપઞ્ચમ |
યજ્ઞાદિનાથં પરમપ્રકાશં નમામિ વિશ્વંભરમીશિતારમ ||૭૦||

ઇત્યેવં સ્તવમાખ્યાતં શિવસ્ય પરમાત્મનઃ |
પાપક્ષયકરં પુત્ર સાયુજ્યમુક્તિદાયકમ ||૭૧||

સર્વરોગહરં મોક્ષપ્રદં સિદ્ધિપ્રદાયકમ |
માઙ્ગલ્યં ભુક્તિમુક્ત્યાદિસાધનં જયવર્ધનમ ||૭૨||

સર્વસ્તવોત્તમં વિદ્ધિ સર્વવેદાન્તશેખરમ |
પઠસ્વાનુદિનં તાત પ્રેમ્ણા ભક્ત્યા વિશુદ્ધિકૃત ||૭૩||

ગોહા સ્ત્રીબાલવિપ્રાદિહન્તાન્યત્પાપકૃત્તથા |
વિશ્વાસઘાતચારી ચ ખાદ્યપેયાદિદૂષકઃ ||૭૪||

કોટિજન્માર્જિતૈઃ પાપૈરસઙ્ખ્યાતૈશ્ચ વેષ્ટિતઃ
અષ્ટોત્તરશતાત્પાઠાત શુદ્ધો ભવતિ નિશ્ચિતમ ||૭૫||

મહારોગયુતો વાપિ મૃત્યુગ્રહયુતસ્તથા |
ત્રિંશત્તદસ્ય પઠનાત્સર્વદુઃખં વિનશ્યતિ ||૭૬||

રાજવશ્યે સહસ્રં તુ સ્ત્રીવશ્યે ચ તદર્ધકમ |
મિત્રવશ્યે પઞ્ચશતં પાઠં કુર્યાત્સમાહિતઃ ||૭૭||

લક્ષપાઠાદ્ભવેચ્ચૈવ શિવ એવ ન સંશયઃ|
બહુના કિમિહોક્તેન ભાવનાસિદ્ધિદાયકઃ ||૭૮||

પાર્વત્યા સહિતં ગિરીન્દ્રશિખરે મુક્તામયે સુન્દરે પીઠે સંસ્થિતમિન્દુશેખરમહર્નાથાદિસંસેવિતમ |

પઞ્ચાસ્યં ફણિરાજકઙ્કણધરં ગઙ્ગાધરં શૂલિનં
ત્ર્યક્ષં પાપહરં નમામિ સતતં પદ્માસનસ્થં શિવમ ||૭૯||

ઇતિ શ્રીપદ્મપુરાણે બ્રહ્મનારદસંવાદે શિવસ્તવરાજઃ સંપૂર્ણઃ ||